# लक्ष्मीकान्तशिक्षा

प्रणम्य नारायणपादपंकजे
समस्तलोकत्रितयार्तिहारिणी
करिष्यते वेदपदानि पाठतो
निरूप्य चोच्चस्वरनिर्णयो मया १
अन्तोदात्तं पदं चेदमाद्युच्चमिदमीदृशम्
नियमो न कृतः कैश्चित्कस्मिंश्चित्स्वरलक्षणे २
एकादेशो यवादेश उदात्तस्संहितागमे
ओदेदलोप्युपात्तो यो विषयो लक्षणस्य सः ३
अन्तोदात्तं पदं यत्स्यादाद्युदात्तं तथैव च
एवं द्वैधं पदं ज्ञातुमिदं शास्त्रं प्रणीयते ४
अत्रान्तोच्चस्वरं पूर्वमकारादिक्रमेण तु
आद्युच्चं च ततो नेत्रक्रमेणैव च गृह्यते ५
नानात्वमिङ्ग्यभूतानां पदानामत्र चेष्यते
व्यस्तान्यभिविनिप्रैतान्यन्तोदात्तपदानि तु ६
अद्यान्योऽश्वतरोऽस्यर्कोऽश्नुवीताङ्गांश्वपोऽप्रति
अभिप्रीता उखापूर्वोऽस्येशानेतीश्वरःपरः ७
असामा त्वन्तराजामाचार्यमाक्त्वाक्ष्णयावमा
अन्याधिचरणार्थ्यस्त्रास्थ्नाष्टमेऽष्टाष्टका तथा ८
आमयाव्याङ्गिरस्यैतोराप्त्वाप्तात्मैतुमार्तवः
आर्तौरालिखिताग्नेय्यापयितारम्भआश्विन ९
आदित्याग्रयणी तृष्णोष्ट्वेतावग्रहवर्ति च
इषेषित इहेध्मे स्युरित ईजान ईश्वरः १०

ईर्मौस्त्रोखोक्षचोतोत्याप्यूर्जा चोर्ध्वार्च्यृचा तथा
एवैचैकादशी चैष एण्येतेनैत ऐन्द्रिया ११
ऐन्द्रवायव कुर्वीत दत्तं पूर्वं  कथा कृता
कृत्वा कृष्णाकृशक्रोडः कर्ता क्रूरां तथैव च १२
कुम्भ्या काव्यः क्षुधा गत्वा गृहीत्वा गर्दभो गिरा
गायत्रिया गायत्री च गाता घोरा घृताप्यथ १३
चन्द्रचन्द्रा चतुर्थे तु चनचित्र चतुर्थ्यपि
चित्वान्तरिक्षे चिन्वीत चिनुते पूर्वमिङ्ग्यतः १४
छाया च छादयित्वा च ह्यतिष्ठतपरं जहि
जाजित्वा जनिता जिह्वा जुषाणा जातस्त्वेङ्ग्यतः १५
तेमधुः प्रतिवित्तायुरम्बेसन्त्वा बृहस्पतिः
एतदनुवाकव्यतिरिक्तेषु ते इति पदमन्तोदात्तं वा भवति १६
त्रि तमीतीक्ष्णतृप्तश्चत्सारीदध्नादिवादिशि
द्रूणानो दक्षिणा दीक्षा दशमे दशमी दिवः १७
दीक्षयित्वा दिशो देवी देव्या दक्षिणतो दिशः
देवावग्रहवर्ति स्याद्वापरोदिविदिक्षु च १८
धित्वाधर्ता ध्रुवा धाता धा धिया नवमे ननु
नाराशंसोऽथ नावा च नेता पूषा पथा पुरा १९
पोषयित्नु परः पुत्रः पृथिव्या पृथिवी पिता
परमेष्ठी प्रियः पर्णः पर्यारिपरमा पृणे २०
प्रस्थाता प्रथमा पङ्क्त्या पावकः परमः पदा
पत्यः प्रेणा पिशङ्गश्च पवयित्वा पिशङ्गिला २१

प्रोक्षिता इषिता इद्ध आप्तुमुक्षित उक्षितम्
उतेति रशितं चेति परेष्वेतेषु पञ्चमे २२
पित्रा पश्वा ततः पृष्ठा पिङ्गला बृहती तथा
बृहत्या बार्हस्पत्या च ब्रह्मा ब्राह्मण एव च २३
बद्ध्वा भूत्वा तथा भित्वा भक्षयित्वा च भिन्धि च
भागो भूता तथाभासा भृत्वा भूम्ना मना मृधा २४
महिना महिमा मन्द्रा मनीषा मध्यतो मृदा
मिन्दा मात्रे तु मित्रोऽहर्मैत्रावरुणमानवी २५
मार्जयित्वा तथा माता मायामूर्धा च मुञ्च वै
माधा याजयतं यज्ञे समीची इहि वर्चसम् २६
पुनः स्योना सदाशेवावैशख्ने अथ यज्ञिया
हिरण्यमुपरात्रश्चास्यैते पूर्वेषु लेष्यते २७
मासीयन्तायतायाच्चा यज्ञो यज्ञे यदा यमः
यूष्णा येयमयुक्तश्च याजी यो योजनेऽथ या २८
रोके च रजता रात्रो रुद्रा रैयाथ रुद्र च
रूपी रुद्रस्तथा राका रूपा रुक्त्वा तदोच्यते २९
लोके लेशे वशा वस्नाविदानो विश्व वास्तु च
वरिणा वाव वर्तन्या वावृधाना वृथा विशा ३०
वारुण्या वरुणी विष्टो विष्टा वक्ता वपा विशि
वेतसे वत्सरो वज्री वाचो विंशस्तु विघ्न च ३१
विदाना विधुरा वित्वा वरुण्या वेङ्ग्यवर्ति च
वैष्णव्या वीक्षितायापि वीन्द्रं वीत्यै तु विक्षु च ३२

विषाणा वदिता वाश्रा वैश्वानर्या च वृद्ध च
वर्तो वाचा विशा वाजी शुक्राशतशुचाशिवा ३३
शिथिराशस्तशश्शास्ता श्वेतः श्वेत शकुन्तिका
शीर्ष्णः शीर्ष्णा ततः श्रोताश्शृणुतेमं परं भवेत् ३४
शाखा श्वा शुक्रशस्ता च षष्ठेषोडशि सत्यसः
स्वा सता सर्व सारे सा सूच्या सव्यः स्रुचा सभा ३५
सौम्या स्थविमतस्सौर्या स्तोता सावित्रिया सह
समुद्रस्सुषिरा स्कन्दस्सप्तेङ्ग्यान्तं तु वर्जयेत् ३६
सवित्राब्दत्सु सनिता व्यस्तं स्वस्ति समान च
सवितैकादश स्थस्था नोच्चपूर्वं तु सत्र चैदा ३७
स सत्या सप्तमे स्योना हत्वा हन्ता हि हाहिता
हुत्वा हव्या ततो हूत्वेत्येवमन्तोच्चवद्धतिः ३८

इत्येवमन्तोदात्तानि पदानि समाप्तानि

इदानीमाद्युदात्तानि गृह्यन्तेऽत्र पदान्यर्धः ३९
विषये लक्षणस्यास्य ह्यन्तोदात्ततया पदम्
नेरितं यत्पदं तस्मादाद्युदात्ततयेष्यते ४०
येषु चेङ्ग्येषु नोदात्तः स्यात्तथादिस्तु गृह्यते
अमाप्रेन्द्रत्वनूबन्ध्येत्येतानि त्रीणि वर्जयेत् ४१
यासां यो यद्धि येनाहेत्येभ्य आसप्तमात्पदात्
बहुस्वरमकारादि चाद्युदात्तं पदं भवेत् ४२
अभितोऽन्याभिरन्तासश्चान्तरिक्षं तथार्धयेत्
अर्वाचीनं चार्यमणमर्पयेदिति नेष्यते ४३

यावादेश्यक्षरान्तं यदः कारान्तं पदं यदि
एकारान्तं तथान्तोच्चमाद्युच्चं न स्वरं पदम् ४४
इदानीमाद्युदात्तानि पदानि गृह्यन्ते
आत्यवान्वप्युपापाध्युद्व्यस्तान्यपि पदानि च ४५
अरात्या अध्वनो देवीरशमिष्ठा अदादयन्
अन्नमस्तमरण्येष्वन्तमभ्रातृव्यो वहोऽसतः ४६
अत्रिरग्ने त्वमेत्यभ्रिरवर्षिष्यन्नथानृतम्
अर्वानीकेनमिन्दाभूत्पिशङ्गिलाच्छिद्यमानया ४७
असुरानस्ति तत्सासदरण्येष्वनसे परम्
अविशत्पदमित्येतत्तमेव परमिष्यते ४८
अदित्यामदितिः स्थाश्रिरसुराणामजाम्यथो
अपथादग्रमग्रेऽह्नोऽयजमानात्तथादितिम् ४९
कद्रूरित्यनुवाकेऽस्मिन्नहरत्पदमिष्यते
अपराभ्यामजस्रोऽत्रिमेवान्तोऽश्वोऽश्वमायुषा ५०
आप आयुष आशानामेवातृणायुरार्तिमात्
आयुष्मन्तं तथा चाग आहतादृक्परं भवेत् ५१
आयुष्मत्यास्ततश्चासीदेवेन्द्रस्येष्टिरिष्टिकाः
इदितीन्द्राय चेशानाप्युदीचीं पदमेव च ५२
उदीच्यामुपस्तिं च स्यादुदीच्यूर्जमृषिस्तथा
ऋगृद्धिमृषयश्चैकामेक एकादशेष्यते ५३
एति तद्यद्धिरण्येन चैकैकस्मात्तथा भवेत्
ओषधीष्वोषधीनां च तदौषधय औषधीः ५४

एवमुच्चस्वरोऽस्माभिर्निर्णीतो वर्णतः क्रमात् ५५

इत्युच्चस्वरनिर्णयसमाप्तः

इत्युच्चलक्ष्मीकान्तशिक्षा समाप्तः

K. Madhava Krishna Sarma, *Descriptive Catalogue of Sanskrit Manuscripts in the Adyar Library, Vol. I—Vedic*, "The Svaraśikṣā with commentary," palm-leaf, 13 folia, 14 1/2 in. x 1 1/2 in., 6 lines in a page, Telugu script, Complete. Adyar Library and Research Centre, Vasanta Press: Adyar, Madras, India, 1942, p. 392.

"Lakṣmīkāntaśikṣāvyākhyā" in Lokesh Chandra and Raghu Vira, *Sanskrit texts on phonetics: A collection of Śikṣā texts*, International Academy of Indian Culture, 1981, pp. 290-307.